ज्ञातटक्रमको ग्रहः । एवं ध्रुवान्नीयमानेन सूत्रेण शरकृतं त्र्यस्त्रं भवति । क्रान्तिवृत्तग्रहस्थानादग्रतः पृष्ठतो वा आयनकलातुल्येऽन्तरे तत् सूत्रं क्रान्तिवृत्ते लगति । अत आयनकला भुजः, अस्फुटविक्षेपः कोटिः, शराग्रक्रान्तिवृत्तयोरन्तरे यावत् सूत्रखण्डं स तत्र कर्णः । एतत् त्र्यस्त्रं वलनत्र्यस्त्रसंभवम् । अतस्त्रैराशिकेन वलनकलानामानयनम् । यदि यष्टिकोट्या वलनकलाभुजो लभ्यते तदा अस्फुटविक्षेपकोट्या किमिति फलमायनकला इति सर्वमुपपन्नम्” प्रमिताक्षरा ।

**आयमन** न० आ+यम—ल्युट् । १दैर्घ्ये णिच्—ल्युट् । २नियमने ३संयतकरणे दृढ़स्य संकुचितस्याकर्षे ४दीर्घीकरणे च । “यथा दृढ़स्य धनुष आयमनम्” छा०उ० ।

**आयल्लक** पु० आयमिव लीयते अत्र ली—आधारे वा०ड ततः संज्ञायां कन् । उत्कण्ठायाम् हेम० ।

**आयस** त्रि० अयसो विकारः अण् स्त्रियां ङीप् । लौहमये । “शक्तिञ्चोभयतस्तीक्ष्णामायसं दण्डमेव वा” “पुमांसं दाहयेत् पापं शयने तप्तआयसे” इति च मनुः । “स चकर्ष परस्मात् तत् अयस्कान्त इवायसम्” रघुः । “मूढ़बुद्धिमिवात्मानं हैमीभूतमिवायसम्” कुमा० । २लौहमयकवचे च ३अङ्गरक्षिण्यां जालिकायां स्त्री । अयएव स्वार्थे अण् । ४लौहे । ततः विकारे मयट् लौहमये त्रि० स्त्रियां ङीप् ।

**आयसीय** त्रि० अयसः सन्निकृष्टदेशादि० कृशा० छण् । लौहसन्निकृष्टदेशादौ ।

**आयस्कार** पु० अयस्कार एव स्वार्थे अण् । लौहकारे त्रिका० ।

**आयस्त** त्रि० आ+यस—क्त । १क्षिप्ते “आयस्तसिंहाकृतिरुत्पपात” किरा० २क्लेशिते ३प्रतिहते ४तीक्ष्णीकृते ५आयासयुक्ते च ।

**आयस्थान** न० द्वैत० । १लाभस्थाने, राज्ञां २शुल्कग्रहणस्थानाद्याकरस्थाने “ठञ् ठगावायस्थानेभ्यः”पा० । ज्योतिषोक्ते ३लग्नादेकादशस्थाने च ।

**आयस्थूण** त्रि० अयोमयी स्थूणायस्य तस्यापत्यं शिवा० अण् । अयस्थूणापत्ये स्त्रियां ङीप् । [त्रित्यर्थे ।

**आयस्य** अव्य० आ+यस—ल्यप् । आयासं कृत्वा भृशं यति-

**आयात** त्रि० आ+या—क्त । आगते स्थानात् स्थानान्तरं प्राप्ते । “यामोयातस्तथापि नायातः” सा०द० । “आयाता मधुयामिनी” उद्भटः । “आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते” देवीमा० ।

**आयाति** पु० आ+या+क्तिच् । “यातिर्ययातिः संयातिरायातिः पञ्चमोमतः” हरि० ३०अ० “यातिर्ययातिः संयातिरायातिः सयतिस्तथा । नहुषोजनयामास षट्सुतान् प्रियवादिनः” इति च हरि० उक्ते १नहुषसुतभेदे आ+या—भावे क्तिन् । २आगमने स्थानान्तरगमने ।

**आयान** न० आ+या—ल्युट् । १ आगमने आयाति यावद्द्रव्यम् आ+या—ल्यु । २स्वभावे जटा० स्वभावस्य यावद्द्रव्ययायित्वात्तथात्वम् ।

**आयाम** पु० आ+यम—भावे घञ् । दैर्घ्यपरिमाणभेदे “अणुमहद्दृस्वदीर्घभेदात् परिमाणचातुर्विध्यमिति वैशेषिकादयः स्वीचक्रुः । अणुमहद्रूपं परिमाणद्वयमिति साङ्ख्याः ह्रस्वदीर्घयोर्महत्त्वएवान्तर्भावात् । तत्र अल्पसंख्यकावयवत्वमणुत्वम् अधिकावयवजन्यत्वं महत्त्वम् तेषु च अवयवप्रचयेषु ययोः पार्श्वयोराधिक्यं तत्र दीर्घत्वव्यवहारः यत्र च पार्श्वयोरल्पत्वं तत्र विस्तीर्णत्वं ह्रस्वत्वं च व्यवह्रियते “अस्थूलमनण्वह्रस्वमदीर्घमिति” श्रुतौ च अवान्तरभेदमाश्रित्यैव परिमाणचातुर्विध्योक्तिर्द्रष्टव्या अस्य गुणमात्रवाचित्वम् न तु अणुमहदादिवत् गुणगुणभयवाचकत्वमपि इति भेदः । “आयामवद्भिः करिणां घटाशतैः” माघः “यावानूर्द्ध्वं बाहुकः पुरुषस्तावदायामः” आश्व०गृ० “यस्य चायामः” पा० “शीतद्रुततरायामाश्च्यामा यान्ति साम्प्रतम्” रामा० । आ+यम+णिच्—अच् । २नियमने प्राणायामः प्राणवायोर्नियमनम् “प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति” “एकाक्षरं परं ब्रह्म प्राणायामः परं तपः” मनुः । आयामोऽस्त्यस्य बला० वा इनि पक्षे मतुप् । आयामी आयामवान् आयामयुक्ते त्रि० स्त्रियां ङीप् । यामशब्दस्याङा मर्यादायाम् अव्ययीभावः । ३प्रहरपर्य्यन्ते अव्य० ।

**आयास** पु० आ+यस—घञ् । अतियत्ने “स्नेहमूलानि दुःखानि देहजानि भयानि च । शोकहर्षौ तथायासः सर्वं स्नेहात् प्रवर्त्तते” भा०व० २०० अ० “रत्यायासमनस्तापक्षुत्पिपासादिसम्भवा” सा०द० ।

**आयासक** त्रि० आ+यस—ण्वुल् । १आयासयुक्ते । णिच्—ण्वुल् । २आयाससम्पादके च ।

**आयासिन्** त्रि० आयसति आ+यस—णिनि । आयासयुक्ते “कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि” शकु० ।

**आयिन्** त्रि० आयोलाभोऽस्त्यस्य इनि । १लाभयुक्ते मतुप् आयवानप्यत्र त्रि० इण—णिनि । २गन्तरि स्त्रियां ङीप् ।

**आयु** त्रि० “छन्दसीणः” उणा० इण—उण् । गमनशीले “ता अस्य